पाद्यम्, अर्घम्, आचनीयम्, पञ्चामृतम्, चन्दनम्, अक्षतान्, रक्तपुष्पाणि, सिन्दूरम्, दूर्वाङ्कुराणि, फलम्, प्रदक्षिणाम् च समर्पयामि। ॐ रक्षासूत्राय नमः भनी नमस्कार गर्ने।

तलको मन्त्र ब्राह्मणले वाचन गरिञ्जेल पूजा गरिरहने–

ॐ रक्षोहणं व्वलगहनं व्वैष्णवीमिदमहन्तं व्वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहन्तं व्वलगमुत्किरामि यं मे समानो यमसजातो निचखानेदमहन्तं व्वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं व्वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्या-ङ्किरामि ॥ (शु.य. ५।२३)

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ॥ ॐ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्नंक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगनौ पर्य्यहामि वैष्णवी वैष्णवमसि वैष्णवाःस्थ ॥ ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजा सत्रसदौ च देवौ । (शु.य.५।२५) ॥ *यति रक्षाबन्धनको पूजा सकियो ॥*

अब क्रमैसँग नाममात्रले चन्दन, अक्षता, पुष्प, धूप, दीप आदिले यथासक्य कलशको पूजागर्ने– ***कलशस्कन्धप्रदेशे–*** *(ईशान कलशको स्कन्धप्रदेशमा चन्दन, धूप, दीप, फूल, अक्षता लिएर नाम मात्रैले पूजागर्ने यसमा* ***गणपतये नमः*** *देखि* ***सर्वेभ्योदेवेभ्यो नमः*** *भन्दा सम्म पूजा गरिरहने–*

ॐ गणपते इहागच्छ इह तिष्ठ गणिपतिं आवाहयामि स्थापयामि पूजयामि ॐ गणपतये नमः । ॐ सूर्य इहागच्छ,

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

इह तिष्ठ सूर्यम् आवाहयामि स्थापयामि पूजयामि ॐ सूर्याय नमः । ॐ देव्यै नमः । ॐ शिवाय नमः । ॐ विष्णवे नमः । ॐ विनायकाय नमः । ॐ दुर्गाय नमः । ॐ वायवे नमः । ॐ आकाशाय नमः । ॐ अश्विनीकुमाराभ्यां नमः । ॐ सूर्याय नमः । ॐ सोमाय नमः । ॐ भौमाय नमः । ॐ बुधाय नमः । ॐ बृहस्पतये नमः । ॐ शुक्राय नमः । ॐ शनये नमः । ॐ राहवे नमः । ॐ केतुभ्यो नमः । ॐ ईश्वराय नमः । ॐ उमाय नमः । ॐ स्कन्दाय नमः । ॐ हरये नमः । ॐ ब्रह्मणे नमः । ॐ इन्द्राय नमः । ॐ यमाय नमः । ॐ कालाय नमः । ॐ चित्रगुप्ताय नमः । ॐ अग्नये नमः । ॐ अद्भ्यो नमः । ॐ भूम्यै नमः । ॐ विष्णवे नमः । ॐ इन्द्राय नमः । ॐ इन्द्राण्यै नमः । ॐ प्रजापतये नमः । ॐ सर्पाय नमः । ॐ ब्रह्मणे नमः । ॐ इन्द्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ सोमाय नमः । ॐ ईशानाय ॐ ब्रह्मणे नमः । ॐ अनन्ताय नमः । ॐ ध्रुवाद्यष्टवसुच्यने नमः । ॐ धात्रादिद्वादशादित्येभ्यो नमः । ॐ वीरभद्राद्येकादशरुद्रेभ्यो नमः । ॐ गौर्यादिषोडशमातृभ्यो नमः । ॐ आवहादि सप्तमरुद्भ्यो नमः । ॐ विनायकाय नमः । ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः । ॐ अर्काय नमः । ॐ वनस्पते इहागच्छ इह तिष्ठ वनस्पतिं आवाहयामि स्थापयामि पूजयामि ॐ वनस्पतये नमः ॥ ॐ कुलदेवताभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ सर्वेभ्योदेवेभ्यो नमः । *यसमा पञ्चोपचारले पूजा गर्ने।*

नवग्रहपूजा :–

१. सूर्यको पूजा –मध्येभागमा रातो अक्षता र रातोफूलले पूजागर्ने– सूर्यको आवाहन गर्ने–

ॐ जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् । तमोऽरिं सर्वपाघ्नं सूर्यमावाहयाम्यहम् ॥

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ ॐ सूर्याय न मम ॥

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यप गोत्र रक्तवर्ण भो सूर्य ! इहागच्छ, इह तिष्ठ ॐ सूर्याय नमः श्रीसूर्यमावाहयामि ॥ स्थापयामि ॥



(चित्रः नवग्रह पूजनमण्डल)

२. चन्द्रमाको पूजा– (आग्नेय दिशामा अर्धचन्द्र, श्वेत)
सेता अक्षता र सेतोफूलले पूजागर्ने–चन्द्रमाको आवाहन गर्ने–

ॐ दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्। ज्योत्स्यानापतिं निशानाथं चन्द्रमावाहयाम्यहम् ॥

ॐ इमं देवाऽ असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥ ॐ सोमाय न मम ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र शुक्लवर्ण भो सोम ! इहागच्छ, इह तिष्ठ ॐ सोमाय नमः सोममावाहयामि, स्थापयामि ॥

३. मङ्गलको पूजा– (दक्षिणमा दिशाको कोठामा)
मङ्गलको आवाहन गर्ने–रातो फूल र राता अक्षता लिएर पूजागर्ने –

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ धरणीगर्भसम्भूतं विद्युतत्तेजसमप्रभम् । कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ।

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाꣳ रेताꣳसि जिन्वति ॥ ॐ भौमाय न मम ॥

ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भवभारद्धाजसगोत्र रक्तवर्ण भो भौम ! इहागच्छ, इह तिष्ठ ॐ भौमाय नमः भौममावाहयामि, स्थापयामि ।

४. बुधको पूजा– ईशानकोणमा पहेंलो वा हरियो फूल अक्षता लिएर पूजागर्ने–बुधको आवाहन गर्ने–

ॐ प्रियङ्गुकलिकाभासं रुपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं सौम्यमावाहयाम्यहम् ॥

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ॐ बुधाय न मम ॥

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेय गोत्र पीत वा हरितवर्ण भो बुध ! इहागच्छ, इह तिष्ठ ॐ बुधाय नमः बुधमावाहयामि, स्थापयामि ॥

५. बृहस्पतिको पूजा– उत्तर दिशामा पहेलो अक्षता र फूलले पूजा गर्ने– बृहस्पतिको आवाहन गर्ने–

ॐ देवानां च ऋषीणाश्च गुरुं काश्चनसन्निभम् । बन्धुभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥ ॐ बृहस्पतये नमः ॥

ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति ऋतुमज्जनेषु । यद्दीदयच्छ्वस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो गुरो ! इहागच्छ, इह तिष्ठ ॐ बृहस्पतये नमः बृहस्पतिमावाहयामि, स्थापयामि ॥ ॐ बृहस्पतये न मम ।

६. शुक्रको पूजा गर्ने– पूर्वमा रहेको सेतो अक्षता र सेतोफूलले

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

पूजागर्ने– शुक्रको आवाहन गर्ने–

ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ॥

ॐ अन्नातपरिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोमृतं मधु ॥ ॐ शुक्राय न मम।

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गव गोत्र शुक्लवर्ण भो शुक्र ! इहागच्छ, इहतिष्ठ ॐ शुक्राय नमः शुक्रमावाहयामि, स्थापयामि ॥

७. शनिको पूजागर्ने (पश्चिममा) कालो अक्षता र कालो फूलले पूजागर्ने– शनिको आवाहन गर्ने–

ॐ नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ॥

ॐ शं नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥ ॐ शनैश्चराय न मम ॥

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यप गोत्र कृष्णवर्ण भो शनैश्चर ! इहागच्छ, इह तिष्ठ ॐ शनैश्चराय नमः शनैश्चरमावाहयामि, स्थापयामि ॥

८. राहुको पूजागर्ने (नैर्ऋत्यकोणमा) कालो अक्षता र कालो फूलले राहुको आवाहन गर्ने–

ॐ अर्धकार्य महावीर्य चन्द्रादित्यविमर्दनम् । सिहिंकागर्भसम्भूतं राहुमावाहयाम्यहम् ॥

ॐ कया नश्चित्रऽ आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ ॐ राहवे न मम ॥

ॐ भूर्भुवः स्वः राठिनपुरोद्भवपैठीन गोत्र कृष्णवर्ण भो राहो ! इहागच्छ, इह तिष्ठ ॐ राहवे नमः राहुमावाहयामि, स्थापयामि ॥

९. केतुको पूजागर्ने– (वायव्यकोणमा) धूवाजस्तो अक्षता र फूल लिएर केतुको आवाहन र पूजा गर्ने–

ॐ पलालाधूम्रसङ्काशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

घोरं केतुमावाहयाम्यहम् ॥

ॐ केतुं कृण्वन्नकेतवे पेशो मर्याऽ अपेशसे। समुषद्भिरजायथाः ॥ ॐ केतवे न मम ॥

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनि गोत्र धूम्रवर्ण कृष्णवर्ण भो केतो ! इहागच्छ, इह तिष्ठ ॐ केतवे नमः केतुमावाहयामि, स्थापयामि ॥

अथ अष्टयोगिनी पूजा:-

अब मङ्गलादि अष्टयोगिनीहरुको आवाहन र पूजागर्ने–

ॐ मंगला, पिंगला धान्य, भ्रामरी, भद्रिका, उल्का, सिद्धा, संकटा सकल अष्टयोगिनी देवता ***इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव वरदो भव ॥*** *भनी प्रत्येकको पूजागर्ने । अष्टयोगिनीहरुको मन्त्रमा नमः भनेपछि चन्दन, अक्षता, फूलपाती चढाउने।*

अष्टयोगिनी मन्त्र-

मंगला– *ॐ ह्रीं मंगले मंगलायै नमः ।* ***पिंगला–*** *ॐ ग्लौं पिंगले वैरिकारिणी प्रसीद नमः* ***धान्य–*** *ॐ श्री धनदे धान्यै नमः ।* ***भ्रामरी–*** *ॐ क्लीं भ्रामरी जगतामधीश्वरी नमः ।* ***भद्रिका–*** *ॐ भद्रिके भद्रं देहि अभद्रं नाशय नमः ।* ***उल्का–*** *ॐ उल्के मम रोगं नाशाय (जृम्भय) नमः ।* ***सिद्धा–*** *ॐ ह्रीं सिद्धे मे सर्वमानसं साधय नमः ।* ***संकटा–*** *ॐ संकटे मम रोगं नाशाय नमः ।*

अष्टचिरञ्जीवि पूजा

अब अष्टचिरञ्जीविको लागि छोटो संकल्प भन्ने आवाहन र पूजागर्ने–



ततोऽष्टदलेषुः– पूर्वे– व्यासम्, आग्नेय– परशुरामम्, दक्षिणे– द्रौणिम्, नैर्ऋत्य– कृपाचार्यम्, पश्चिमे– बलिम्, वायव्य– प्रल्हालम्, उत्तरे–हनुमन्तम्, ऐशान्ये–

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

विभीषणम्, मध्ये मार्कण्डेयम्, मध्ये षष्ठिका च स्थापयित्वा पूजयेत्। तत- मध्ये मार्कण्डेयम् आवाहयामि, स्थापयामि पूजयामि भो मार्कण्डेय इहागच्छ इहतिष्ठ मम पूजां गृहाण इत्यावाह्य, आसनम्, पाद्यम्, अर्घम्, आचमनीयम्, स्नानीयम्, पञ्चामृतम्, पुनराचमनीयम्, चन्दनम्, अक्षतान्, पुष्पाणि, समर्पयामि, मार्कण्डेय नमः भनी सबै *अष्टचिरञ्जीवीदेवतालाई पञ्चोपचार/षोडशोपचारले पूजागर्ने।*

त्यसपछि अष्टचिरञ्जीवीहरुको प्रार्थनागर्ने–

अब आवाहन र स्थापनपछि हातमा अक्षता लिएर ॐ मनो जूति ०.... मन्त्रले नवग्रहमण्डलमा अक्षता छोडिदिने।

अस्मिन नवग्रहमण्डले आवाहिताः सूर्यादिनवग्रहा देवाः सुप्रतिष्ठिता वरदा भवन्तु *भन्ने।*

यसरी पूजा गरिसकेपछि ॐ आवाहितसूर्यादिनवग्रहेभ्यो देवेभ्यो नमः भनि नमस्कार गर्ने।

आचार्यले– तलको मन्त्र भन्ने–

कर्तालि–फूलअक्षता लिएर जुम्लाहात गर्ने –

ॐ ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुःशशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः सर्वेग्रहा शान्तिकरा भवन्तु ॥ सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गल मंगलः सद्बुद्धि च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः। राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥

मन्त्र भनी फूलअक्षता चढाईदिने।।

॥ इति नवग्रह, अष्टयोगिनी, अष्यचिरञ्जीवी पूजा विधि समाप्ता ॥

अथ होम सङ्कल्प

अब होम सङ्कल्प गर्नका लागि हातमा जौ, तिल, कुश लिने :–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादिदेशकालादीन् संङ्कीर्त्य (अमुक) गोत्रस्य, (अमुक) प्रवरस्य (अमुक) शाखान्तर्गत (अमुक) वेदाध्यायिनो (अमुक) शर्माणो वर्मणो, गुप्तस्य दास्य वा मम (अमुक) कर्मणि आराज्यभागपञ्च

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

वारुणिहोमपूर्वकप्रधानभूतेभ्यो देवेभ्यो गणपत्यादि पञ्चायतनेभ्यो विनायकादिपञ्चलोकपालेभ्यः सूर्यादि नवग्रहेभ्य ईश्वराद्यधिदेवेभ्योऽग्न्यादिप्रत्यधिदेवेभ्य इन्द्रादि दशदिक पालेभ्यो ध्रुवाद्यष्टवसुभ्यो धात्रादिद्वादशदित्येभ्यो वीरभद्राद्येकादश रुद्रभ्यो गौर्यादिषोडशमातृभ्य आवहादिसप्तमरुद्भ्यो विनायकब्रह्म रुद्रार्कवनस्पतिभ्यः प्रधानदेवेभ्यः तथा चतुः स्वस्तिभ्यः पयः पञ्चभ्यः षडविष्णुभ्यो द्वादशदेवताभ्योः द्वादशशान्तिभ्यः षट्प्रातभ्यः षड्वातेभ्य स्न्यनडुद्भ्यः पञ्चभगेभ्यः पञ्चेन्द्रियेभ्यो पञ्चवरुणेभ्यो गायन्त्र्यै सावित्र्यै सरस्वत्यै गृहमात्रेऽन्नपूर्णाये महालक्ष्म्यै महारिष्टविनाशिन्यै चण्ड्यै द्यौराल्यै वास्तुदेवाय भूमिदेवाय गैडुदेवाय क्षेत्रपालाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासुकिभ्यो मित्रलोकपालय मान्धात्रे तीर्थराजाय व्रतराजाय पुनर्दिक्पालेभ्यस्तिथिभ्यो नक्षत्रेभ्यो वारेभ्यः करणेभ्य वातेभ्यो मेघेभ्यः समुद्रेभ्यो नदीभ्य स्थानविशेषाधिपतिदेवताभ्यः सर्वदेवेभ्यः सर्वहोमपूरणार्थेभ्यः पञ्चपाण्डवेभ्यो भीमसेनाय पितृभ्यो वैश्वानराय तथोत्तराङ्गत्वेन भूर्भुवः स्वः अग्निवरुणसवितृविष्णु विश्वेदेव मरुत्स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यश्च इद माज्यादिद्रव्य होमं यथासंख्येन ब्राह्मणद्वारा हवनं करिष्ये ॥ *भनी होमसङ्कल्प गर्ने ॥*

त्यसपछि उपनयन कुश वायाँ हातमा लिने र उठेर प्रजापतिलाई मनमनै ध्यान गर्ने र पहिले स्थापित गरेको तीनटुक्रा समिधा ध्यूमा चोबेर आगोमा हाल्दा तलको मन्त्र भन्ने ।

ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥ *भनी समिधा हवनगर्ने ।*

पूर्व स्थापित गरेको पवित्रले प्रोक्षणीपात्रको जल दाहिने हातमा लिएर अभिमन्त्रण गर्ने ।

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

ॐ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥

त्यसपछि त्यही प्रोक्षणीको जलले अग्निलाई वरिपरी सेचन गर्ने र तलको मन्त्र भन्ने–

ॐ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे ॥

पातितदक्षिणजानुः कुशेन ब्रह्मणन्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः।

अब पवित्रसहित प्रोक्षणीको जलले अग्निको प्रदक्षिणा गर्नु। त्यसपछि प्रणीतापात्रमा पवित्र राखेर वायाँ घुँडा मारेर कुशले ब्रह्मालाई छोई अग्निमा सूरोले घिउको आहुति दिने। यी १२ आहुतिसम्म घिउ हवन गर्दा हरेक पटकको आहुतिमा सुरोको टुप्पामा रहेको घिउ प्रोक्षणी पात्रमा हाल्नुपर्छ।

अथ प्रजापत्यादिवनस्पत्यन्तहोमः-

अब होम घिउको होम गर्नुपर्छ (ब्राह्मणले स्वाहा भनेपछि कर्ताले घिउको होम दिने गर्नुपर्छ)

यसमन्त्रले प्रजापतिलाई घिउको आहुति दिनु– (पहिलो आहुति मनमनै भनेर दिने)

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः। ॐ प्रजापतये स्वाहा इदं प्रजापतये न ममः। प्रोक्षणीपात्रेऽपि।

यसमन्त्रले इन्द्रलाई आहुति दिनु–

ॐ इन्द्रायेति प्रजापतय प्रजापतिऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता आज्यहोमे विनियोगः ॐइन्द्राय स्वाहा इदंमिन्द्राय न मम। इति आधारौ प्रोक्षणीपात्रेऽपि। (घिउ चुहाउँदै लगेर *प्रोक्षणीपात्रमा सुरो चोभेर हाल्नु)*

यसमन्त्रले अग्निलाई आहुति दिनु–

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ अग्नये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः ऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये स्वाहा इदमग्नये न मम । प्रोक्षणीपात्रेऽपि । (प्रोक्षणीपात्रमा सुरो चोभेर हालिदिने)

यसमन्त्रले अग्निको उत्तरतिरको ज्वालामा आहुति दिनु–

ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा इदं सोमाय न मम । प्रोक्षणीपात्रेऽपि । *(प्रोक्षणीपात्रमा सुरोको टुप्पा चोभिदिने र कुशले पुछ्ने)*

तलको मन्त्रले सुरोमा बाकी रहेको घिउ प्रोक्षणी पात्रमा हालिदिनु–

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिरग्नि-वायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्न्याधाने विनियोगः । ॐ भूः स्वाहा इदमग्नये न मम । प्रोक्षणीपात्रेऽपि । ॐ भुवः स्वाहा । इदं वायवे न मम । प्रोक्षणीपात्रेऽपि । ॐ स्वः स्वाहा । इदं सूर्याय न मम । प्रोक्षणीपात्रेऽपि ।

पञ्चवारुणिहोम:-

अब महाव्याहृतिमा अग्नि, वायु र सूर्यलाई विनियोग पढेर आहुति दिनु)

यसमन्त्रले अग्नि र वरुणलाई आहुति दिनु–

ॐ त्वं नो अग्ने इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः प्रायश्चित्तहोमे विनियोगः । ॐ त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि । (बाकी सुरोमा रहेको घिउ प्रोक्षणीपात्रमा हालिदिने)

फेरि पहिले जस्तै गर्नु–

ॐ स त्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः । ॐ स त्वं नो अग्नेवमो भवोती नेदिष्ठो अस्याऽ उषसो व्युष्टौ । अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽ एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

प्रोक्षणीपात्रेऽपि । *(बाकी सुरोमा रहेको घिउ प्रोक्षणीपात्रमा हालिदिने)*
अब तलको मन्त्र पढेर केबल घिउको मात्र आहुति दिनु–

ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि । अया नो यज्ञं व्वहास्यया नो धेहि भेषजस्वाहा ॥ इदमग्नये न मम । प्रोक्षणीपात्रेऽपि । (बाकी सुरोमा रहेको घिउ प्रोक्षणीपात्रमा हालिदिने)
तलको मन्त्रले वरुण, सूर्य, विष्णु विश्वदेव, मरुत् र अर्कलाई आहुति दिनु–

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वदेवा मरुतः स्वर्का देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं व्वरुणं सहस्रं यज्ञियाः पाशा व्वितता महान्तः । ते भिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । प्रोक्षणीपात्रेऽपि । (बाकी सुरोमा रहेको घिउ प्रोक्षणीपात्रमा हालिदिने)
तलको मन्त्रले बाकी रहेको सुरोको घिउ प्रोक्षणीपात्रमा हालिदिने।

ॐ उदुत्तमिति शुनः शेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः । ॐ उदुत्तमं व्वरुण पाशमस्यदवाधमं व्विमध्यमश्रथाय । अथा व्वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि । (बाकी सुरोमा रहेको घिउ प्रोक्षणीपात्रमा हालिदिने)

एताः प्रायश्चित्तसंज्ञकाः ॥ यी प्रायश्चित संज्ञकका हवनहरु हुन्।

॥ यति पञ्चवारुणी हवन भयो ॥

अथ प्रधानदेवता होमः

(अब प्रधानदेवताको होम शुरु हुन्छ)
ब्राह्मणले– तलको श्लोकहरु पढ्ने।
कर्ताले– चन्दन फूलअक्षता लिएर जुम्लाहात गर्ने।

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

गणेशो भास्करो देवी शिवो विष्णुश्च पञ्चमः ।
पञ्चायतननामानि कथिताः पञ्चदेवताः ॥१॥
विनायकस्तथा दुर्गा वायुराकाश एव च ।
नासत्यौ चेति पञ्चैते लोकपाला प्रकीर्तिताः ॥२॥
सूर्यः सोमश्च भौमश्च बुधो जीवश्च भार्गव ।
शनी राहुश्च केतुश्च कथिताश्च नवग्रहाः ॥३॥
ईश्वरश्च उमा स्कन्दो विष्णुर्ब्रह्मा शचीपतिः
यमः कालश्चित्रगुप्त इत्येता अधिदेवता ॥४॥
अग्निरापो धरा विष्णुरिन्द्र ऐन्द्री प्रैजापतिः
सर्पा ब्रह्मा क्रमात्प्रोक्ता नव प्रत्येधिदेवता : ॥५॥
इन्द्राग्नि यमनिर्ऋती वरुणो मरुतों विधुः
ईशो ब्रह्मा तथानन्तो दिक्पालाः दश कीर्तिताः ॥६॥
ध्रुवाद्यष्टवसुर्ज्ञेयो धात्रादित्यास्तु द्वादश
वीरभद्राद्येकादश गौर्यादिमातृषोडश ॥७॥
आवहादिमरुत्सप्त विनायकविधी हरिः
रुद्रश्चार्कस्तथा प्रोक्तो वनस्पतिः क्रमेण हि ॥८॥
चतुः स्वस्तिः पयःपञ्च षड्विष्णुर्देव द्वादश ।
शान्तिर्द्वादश षट्प्रातः षड्वातास्तु क्रमेण हि ॥९॥
अनड्डुत्संज्ञको ज्ञेयो होमकर्मणि वै ध्रुवम् ।
पञ्चभगेन्द्रियाः पञ्च वरुणाः पञ्च एव च ॥१०॥
गायत्री चैव सावित्री वाग्देवी गृहमातृकाः ।
अन्नपूर्ण महालक्ष्मी महारिष्यविनाशिनी ॥११॥
चण्डी द्यौराली विज्ञेया वास्तुभूम्यस्तथैव च
गैड्श्च क्षेत्रपालश्च ग्रामदेवास्ततः परम् ॥१२॥
स्वर्गेन्द्रो वासुकिश्चैव मित्रलोकस्तथैव च ।
माध्धाता तीर्थराज्श्च व्रतराजस्ततः परम् ॥१३॥
पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः ।
वारश्च करणश्चैव वायुमेधसमुद्रकाः ॥१४॥

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

नदीष्टकुलदेवाश्च स्थापिता देवताः क्रमात् ।
भैरवो भैरवी विन्ध्यवासिनी स्थानदेवताः ॥१५॥
एषोह सर्वैदेवाश्च शुक्रज्योतिस्तथैव च ।
पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ॥१६॥
पूर्णपात्रं ततो दद्याद्बहिर्होमस्ततः परम् ।
गोभूरत्नहिरण्यादि रौप्यवस्त्राणि चैव हि ॥१७॥
देयानि द्विजमुख्येभ्यो यजमानै र्विशेषतः ।

इति होमसूत्राणि ॥

अब गणपत्यादि पाञ्चायन देवताहरुलाई हवन गर्नेः–(गणेश, सूर्य, देवी, शिव र विष्णु)

यहाबाट घिउको साथमा चरु पनि हवन गर्नुपर्छ–

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम्॥ ॐ गणपतये स्वाहा इदं गणपतये न मम ॥

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ सूर्याय स्वाहा इदं सूर्याय न मम ॥

ॐ देवीर्द्वारऽ इन्द्रꣳ सङ्घाते वीड्वीर्यामन्नवर्धयन्। आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज॥ ॐ देव्यै स्वाहा इदंदेव्यै न मम॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ ॐ शिवाय स्वाहा इदं शिवाय न मम । अत्र प्रणीतोदकस्पर्शः । (सुरोलाई प्रणीतापात्रको जलमा चोभ्ने)

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि। वैष्णवमसि विष्णवे त्वा ॐ विष्णवे स्वाहा इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

विष्णवे न मम।

इति पाञ्चायनाः। (यति पाञ्चायन देवताको हवन भयो)

पञ्चलोकपालाः पाँचलोकपालहरु- विनायक, दुर्गा, वायु, आकाश र अश्विनीकुमार)

अब आज्यथाली (मानो) मा घिउ थप्ने-

(अब पञ्चलोकपालहरुको घिउ र चरुले हवन गर्नुपर्छ)

ॐ गणानां त्वा गणपतिॅं हवामहे प्रियाणां त्वा प्रियपतिॅं हवामहे निधीनां त्वा निधिपतिॅं हवामहे वसो मम। आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम्॥ ॐ विनायकाय स्वाहा इदं विनायकाय न मम॥

ॐ आम्बेऽ अम्बिकेम्बालिके न मानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीॅं॥ ॐ दुर्गायै स्वाहा इदं दुर्गायै न मम॥

ॐ व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्त्सोमपीतये॥ ॐ वायवे स्वाहा इदं वायवे न मम।

ॐ ऊर्ध्वाऽअस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीॅंष्यग्नेः। द्युमत्तमाः सुप्रतीकस्य सूनोः॥ ॐ आकाशाय स्वाहा इदमाकाशायन मम॥

ॐ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणे बलाय श्रियै यशसेभिषिञ्चामि॥ ॐ अश्विनीकुमाराय स्वाहा इदंमश्विनीकुमाराभ्यां न मम।

इति पञ्चलोकपालाः॥ (यति पञ्चलोकपालहरुको हवन भयो)

नवग्रहाः *अब आज्यथाली (मानो) मा घिउ थप्ने-*

(नवग्रहहरुको होम प्रारम्भ हुन्छ)-

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ ॐ सूर्याय स्वाहा इदं सूर्याय न मम॥

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

ॐ इमं देवाऽ असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकं ब्राह्मणानाꣳ राजा ॥ॐ सोमाय स्वाहा इदं सोमाय न मम ॥

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाꣳ रेताꣳसि जिन्वति ॥ ॐ भौमाय स्वाहा इदं भौमाय न मम।

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ॐ बुधाय स्वाहा इदं बुधाय न मम ॥

ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्। उपयाम गृहीतोषि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥ ॐ बृहस्पतये स्वाहा इदं बृहस्पतये न मम।

ॐ अन्नातपरिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्र-स्येन्द्रियमिदं पयोमृतं मधु ॥ ॐशुक्राय स्वाहा इदंशुक्राय न मम।

ॐ शं नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥ ॐ शनैश्चराय स्वाहा इदं शनैश्चराय न मम ॥

ॐ कया नश्चित्रऽ आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॐ राहवे स्वाहा इदं राहवे न मम ॥

ॐ केतुं कृण्वन्नकेतवे पेशो मर्याऽ अपेशसे। समुषद्भिरजायथाः ॥ ॐ केतवो स्वाहा। इदं केतवे न मम ॥

॥ इति नवग्रहाः होम समाप्ता ॥

अधिदेवता⊗ : *अब आज्यथाली (मानो) मा घिउ थप्ने–*

अब अधिदेवताको घिउ र चरुसहित होम गर्ने –

⊗ *ईश्वर, उमा, स्कन्द, विष्णु, ब्रह्मा, इन्द्र, यमराज, काल, चित्रगुप्त यी नौवटा देवताहरु हुन्।(संस्कृत नेपाली वृहत् शब्दकोश पृ. ३६)*

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ॐ ईश्वराय स्वाहा इदंमीश्वराय न मम। अत्र प्रणीतोदकस्पर्शः। *(सुरोलाई प्रणीतामा चोभ्ने र उपजेवनमा पुछ्ने)*

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽ इषाण सर्वलोकं मऽ इषाण ॥ ॐ उमाय स्वाहा इदंमुमायै न मम ॥

ॐ यदक्रन्दः प्रथमं जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ ॐ स्कन्दाय स्वाहा इदं स्कन्दाय न मम ॥

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि। वैष्णवमसि विष्णवे त्वा ॥ ॐ विष्णवे स्वाहा इदं विष्णवे न मम ॥

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम।

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोसि ॥ ॐ यमाय स्वाहा इदं यमाय न मम। अत्र प्रणीतोदकस्पर्शः। (सुरोलाई प्रणीतापात्रको पानीमा चोभ्ने र उपजेवनमा पुछ्ने)

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽ उन्नयामि। समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ ॐ कालाय स्वाहा इदं

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

कालाय न मम । अत्र प्रणीतोदकस्पर्शः ॥ (सुरोलाई प्रणीतामा चोभ्ने र उपजेवनमा पुछ्ने)

ॐ इन्धानास्त्वा शतᳪं हिमा द्युमन्तᳪं समिधीमहि। वयस्वन्तो वयस्कृतᳪं सहस्वन्तः सहस्कृतम्। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्। चित्रावसो स्वस्ति ते पारमशीय॥ ॐ चित्रगुप्ताय स्वाहा इदं चित्रगुप्ताय न मम। अत्र प्रणीतोदकस्पर्शः ॥ (सुरोलाई प्रणीतामा चोभ्नर उपजेवनमा पुछ्ने)

इति अधिदेवताः ॥ (यति अधिदेवताहरुको हवन भयो)

प्रत्यधिदेवता:- *अब आज्यथाली (मानो) मा घिउ थप्ने-*

अब प्रत्यधिदेवतालाई हवन गर्नेः- (घिउ र चरुसहित)

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ऽ आसादयादिह॥ ॐ अग्नये स्वाहा इदमग्नये न मम।

ॐ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सञ्जायसे पुनः॥ ॐ अदभ्य स्वाहा इदंमद्भ्यो न मम॥

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। अप नः शोशुचदघम्। ॐ भूम्यै स्वाहा इदं भूम्यै न मम।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाᳪंसुरे॥ ॐ विष्णवे स्वाहा इदं विष्णवे न मम॥

ॐ इन्द्रऽ आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽ एतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्॥ ॐ इन्द्राय स्वाहा इदमिन्द्रय न मम॥

ॐ अदित्यै रास्नासीन्द्राण्याऽ उष्णीषः। पूषासि घर्माय दीष्व॥ ॐ इन्द्राण्यै स्वाहा इदमिन्द्राण्यै न मम॥

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वयᳪं स्यामपतयो रयीणाम्॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम॥

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ॐ सर्पेभ्यः स्वाहा इदं सर्पेभ्यो न मम॥

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॥ इति प्रत्यधिदेवताः ॥ (यति प्रत्यधिदेवताहरुको होम समाप्त भयो)

दशदिक्पाला˜ :- अब आज्यथाली (मानो) मा घिउ थप्ने-

दशदिक्पालहरुको होम प्रारम्भ : (घिउ र चरुसहित)

ॐ त्रातारमिन्द्रमवितारमिन्द्रᳬ हवेहवे सुहवᳬ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रᳬ स्वस्ति नो मघवा धात्विन्द्रः ॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम॥

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ऽ आ सादयादिह॥ ॐ अग्नये स्वाहा इदमग्नये न मम॥

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु पृथिव्याः सᳬस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोसि॥ ॐ यमाय स्वाहा इदं यमाय न मम। अत्र प्रणीतोदकस्पर्शः। *(सुरोलाई प्रणीतापात्रमा चोभ्ने र उपजेवनमा पुछ्ने)*

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ ॐ निर्ऋतये स्वाहा इदं निर्ऋतये न मम। अत्र प्रणीतोदकस्पर्शः। (सुरोलाई प्रणीतामा चोभ्ने र उपजेवनमा पुछ्ने)

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्यऋतसदन

˜ *दशथरी दिशाको रक्षागर्ने देवताहरु- पूर्वमा इन्द्र, आग्नेयमा अग्नि, दक्षिणामा यमराज, नैऋत्यमा निऋति, पश्चिममा वरुण, वायव्यमा वायु, उत्तरमा कुवेर, ईशानमा ईश्वर, उर्ध्वमा ब्रह्मा, अधमा अनन्त हुन्। (सं. ने. वृहत शब्दकोश पृ. ५४०)*

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

मासीद ॥ ॐ वरुणाय स्वाहा इदं वरुणाय न मम।

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये ॥ ॐ वायवे स्वाहा इदं वायवे न मम।

ॐ सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ॐ ईश्वराय* (ईशानाय) स्वाहा इदमीशानाय न मम। अत्र प्रणीतोदकस्पर्शः। (सुरोलाई प्रणीतामा चोब्ने र उपजेवनमा पुछ्ने)

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च व्वि वः ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठ द्दशाङ्गुलम् ॥ ॐ अनन्ताय स्वाहा इदमनन्ताय न मम।

॥ यति दशदिक्पालहरुको हवन समाप्त भयो ॥

अष्टवसव[1] :- *अब आज्यथाली (मानो) मा घिउ थप्ने-*

अब अष्टवसुको होम प्रारम्भ हुन्छ- यसमा पनि घिउ र चरुको हवन गर्ने)

---

* *ईशान दिशाका अधिपति ईश्वर भएकाले ईश्वराय स्वाहा हुनुपर्नेमा अधिकांश अग्निस्थापनाका विधिहरुमा ईशानाय स्वाहा मात्र भएकाले केही त्रुटिभएको हो कि भन्ने संभि यहाँ ईश्वराय स्वाहा राखिएको छ।*

[1] *अष्टवसु भन्नाले - आठ थरी गण देवताहरु, महाभारतअनुसार धर, ध्रुव, सोम, अह, अनिल, अनल, प्रत्यूष र प्रभावस, विष्णुपुराणअनुसार- आप, ध्रुव, सोम, धर्म, अनिल, अनल, प्रत्यूष, र प्रभास, भागवतअनुसार- द्रोण, प्राण, ध्रुव, अर्क, अग्नि, दोष, वसु र विभावसु। हरिवंशअनुसार- आप, धर, ध्रुव, सोम, अनिल, अनल, प्रत्यूष र प्रभास हुन्। (सं. ने. शब्दकोश पृष्ठ १३०)*

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ सुगा वो देवाः सदनाऽअकर्म यऽआजग्मेदर्थ्ं सवनं जुषाणाः। भरमाणा वहमाना हवीर्थ्ं ष्यस्मे धत्त वसवो वसूनि ॥ ॐ ध्रुवाद्यष्टवसुभ्यः स्वाहा इदं ध्रुवाद्यष्टवसभ्यो न ममः।

द्वादशादित्या : *अब आज्यथाली (मानो) मा घिउ थप्ने–*

अब द्वादशादित्याको होम प्रारम्भ हुन्छ– यसमा पनि घिउ र चरुको हवन गर्ने)

ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। आ वोर्वाची सुमतिर्ववृत्यादर्थ्ंहोश्चिद्या वरिवोवित्तरासत् ॐ धात्रादिद्वादशादित्येभ्यः स्वाहा इदं धात्रादिद्वादशादित्येभ्यो न मम॥

एकादशरुद्रा: *अब आज्यथाली (मानो) मा घिउ थप्ने–*

अब एकादशरुद्रको होम प्रारम्भ हुन्छ– यसमा पनि घिउ र चरुको हवन गर्ने)

ॐ य एतावन्तश्च भूयार्थ्ंसश्च दिशो रुद्रा वितस्थिरे। तेषार्थ्ं सहस्रयोजनेव धन्वानी तन्मसी॥ ॐ वीरभद्राद्येकादशरुद्रेभ्यः स्वाहा इदं वीरभद्राद्येकादशरुद्रेभ्यो न मम। अत्र प्रणीतोदकस्पर्शः। (सुरोलाई प्रणीतापात्रमा चोभ्ने र उपजेवनमा पुछ्ने)

षोडशमातर :- *अब आज्यथाली (मानो) मा घिउ थप्ने–*

अब षोड्शमाताको होम प्रारम्भ हुन्छ– यसमा पनि घिउ र चरुको हवन गर्ने)

ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्यपदी नवपदी ब्बभूवुषि सहस्राक्षरा परमे व्योमन् ॥ ॐ गौर्यादिषोडशमातृभ्यः स्वाहा इदं गौर्यादिषोडशमातृभ्यो न मम।

सप्तमरुत: *अब आज्यथाली (मानो) मा घिउ थप्ने–*

अब सप्तमरुतको होम प्रारम्भ हुन्छ– यसमा पनि घिउ र चरुको हवन गर्ने)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

ॐ मरुतो यस्य हिं क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः॥ ॐ सप्तमरुतभ्यो स्वाहा इदमावहादि सप्तमरुद्भ्यो न मम॥

विनायकादिषट्:- *अब आज्यथाली (मानो) मा घिउ थप्ने- अब ६ ओटा विनायकादि देवताको होम प्रारम्भ हुन्छ- यसमा पनि घिउ र चरुको हवन गर्ने)*

ॐ गणानान्त्वा गणपतिथं॑ हवामहे प्रियाणान्त्वा प्रियपतिथं॑ हवामहे निधीनां त्वा निधिपतिथं॑ हवामहे वसो मम। आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम्॥ ॐ विनायकाय स्वाहा इदं विनाकाय न मम॥१॥

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च व्वि वः॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥२॥

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाथं॑सुरे॥ ॐ विष्णवे स्वाहा इदं विष्णवे न मम॥३॥

ॐ मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॐ रुद्राय स्वाहा इदं रुद्राय न मम॥४॥

अत्र प्रणीतोदकस्पर्शः। *(सुरोलाई प्रणीतापात्रको जलमा चोभ्ने र उपजेवनमा पुछ्ने)*

ॐ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं मऽ आसन्। अर्कस्त्रिधातू रजसो विमानोजस्त्रो घर्मो हविरस्मि नाम॥ ॐ अर्काय स्वाहा इदमकार्य न मम॥५॥

ॐ व्वनस्पते व्वीड्वङ्गो हि भूयाऽ अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि॥ ॐ वनस्पतये स्वाहा इदं वनस्पतये न मम॥६॥

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

विशेषकर्म:-

यहाँ विशेष भन्नाले जुन उद्देश्य लिएर त्यो कर्म गर्न लागिएको हो, त्यस कर्मको प्रधान देवताको विशेष पूजा होम आदि जे जति गर्नुपर्ने छ त्यो सबै गरिसकेर मात्र चतुःस्वस्त्यादि होम गर्नुपर्छ। जुन उद्देश्यले हवन गरेको छ, त्यो विशेष कार्य सकेर अनि फेरी यहाँबाट हवन गर्नुपर्छ।

जस्तैः यदि सुत्केरी चोख्याउन बच्चाको न्वारान गर्ने भएमा नामकरण संस्कारको लागि चाहिने सामग्री तयार गरी (नामकरण सामग्री यसै पुस्तकको पूजासामग्री खण्डमा हेर्ने) काँसको पात्रमा वा टपरीमा एक माना चामल राखी त्यसमाथि पीपलको पातमा ज्योतिषीय गणनाअनुसार जुरेको नक्षत्र नाम, मास देवताको नाम, र अर्कोमा कुलदेवताको नाम लेख्ने, नामराख्दा भरसक छोराको भए जोर र छोरीको भएमा विजोर राख्ने वा छोरो भएमा दुई/चार अक्षरको नाम र छोरी भएमा तीन अक्षरको नाम राख्नु। *(सामान्य चलनअनुसार नाम राख्दा वस्तु वा भावविशेषका नामहरु राख्न हुँदैन भन्ने शास्त्रको मान्यता छ। जस्तैः वृक्षहरुको नाम, नदी, पर्वत, पहाड र अन्धकार जनाउने नामहरु बच्चाको नाममा प्रयोग नगर्नु भन्ने चलन भए पनि आजभोलि यो मान्यता लोप हुँदै जान लागेको देखिन्छ।)* एउटा पीपलको पातमा अष्टदल बनाई अष्टचिरञ्जीवीहरुको नाम लेखी क्रमैसँग पूजागर्ने धूपदीप नैवेद्य भेटी चढाउने। माङ्गलिक स्तोत्रहरु वाचन गर्ने। अब बच्चालाई चोखो कपडा लगाइदिएर चन्द्रमा सम्मुख वा दाहिनेतिर पारी बच्चालाई पुरोहित वा पिताले दाहिने कानमा ३ पटक नाम सुनाउनु। (**हे कुमार, (छोरो भएमा), हे कुमारी (छोरी भएमा) त्वम् ...... शर्मा (......नाम्नी) असि**। यसपछि नाम लेखिएको पीपलको पातलाई घरको दलिन वा छानोमा लगेर राख्ने।

नामकरण संस्कार पछि चतुःस्वस्त्यादि होम गर्नुपर्छ। होम गर्दा स्वाहा भनेपछि घिउ र चरु होम गर्नुपर्छ)

चतुःस्वस्त्यादि होम:- अब आज्यथाली (मानो) मा घिउ थप्ने

अब चतुःस्वस्तिको होम शुरु हुन्छ। (घिउ र चरुसहित)

यसमन्त्रले चतुःस्वस्तिलाई हवन गर्नु–

ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

विश्ववेदाः। स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पति-र्दधातु॥ ॐ चतुःस्वस्तिभ्यः स्वाहा इदं चतुःस्वस्तिभ्यो न मम।

यसमन्त्रले पयपञ्चलाई हवन गर्नु-

ॐ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्॥ ॐ पयः पञ्चभ्यः स्वाहा इदं पयः पञ्चभ्यो न मम।

यसमन्त्रले षड्विष्णुलाई हवन गर्नु-

ॐ व्विष्णोरराटमसि व्विष्णोः श्नप्त्रे स्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोऽसि। व्वैष्णवमसि विष्णवे त्वा॥ ॐ षड्विष्णुभ्यस्वाहा इदं षड्विष्णुभ्यो न मम।

यसमन्त्रले द्वादश देवतालाई हवन गर्नु-

ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥ ॐ द्वादशदेवेभ्यः स्वाहा इदं द्वादशदेवेभ्यो न मम॥

यसमन्त्रले द्वादश शान्तिलाई हवन गर्नु-

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ ॐ द्वादशशान्तिभ्यः स्वाहा इदं द्वादशशान्तिभ्यो न मम॥

ॐ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पपतिं प्रातः सोममुत रुद्रꣳ हुवेम॥ ॐ षट्प्रातभ्यः स्वाहा इदं षट्प्रातभ्यों न मम।

ॐ समुद्द्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा। अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा। अवस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय॥ ॐ षट्वातेभ्यः स्वाहा इदं षट्वातेभ्यो न मम॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

ॐ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो विराट् छन्द पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वयऽ उष्णिक् छन्दस्तुर्यवाड्वयोनुष्टुप् छन्दो लोकं ता इन्द्रम्॥ ॐ त्र्यनडुद्भ्यः स्वाहा इदं त्र्यनडुद्भ्यो न मम।

ॐ भगऽ एव भगवाँ२ऽ अस्तु देवास्तेन वयं भगवन्तः स्याम। तं त्वा भग सर्वऽ इज्जोहवीति स नो भग पुरऽ एता भवेह॥ ॐ पञ्चभगेभ्यः स्वाहा इदं पञ्चभगेभ्यो न मम।

ॐ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे॥ ॐ पञ्चेन्द्रिभ्यः स्वाहा इदं पञ्चेन्द्रिभ्यो न मम।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्यऋतसदन मासीद॥ ॐ पञ्चवरुणेभ्यो स्वाहा इदं पञ्चवरुणेभ्यो न मम॥

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। ब्बृहतयुष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा॥ ॐ गात्रत्र्यै स्वाहा इदं गात्रत्र्यै न मम।

ॐ उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधाऽ असि चनो मयि धेहि। जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे॥ ॐ सावित्र्यै स्वाहा इदं सावित्र्यै न मम।

ॐ सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति। अपाᳬ रसेन वरुणो न साम्नेन्द्रᳬ श्रियै जनयन्नप्सु राजा॥ ॐ सरस्वत्यै स्वाहा इदं सरस्वत्यै न मम।

ॐ गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रतऽ एमसि। ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ ॐ गृहमात्रे स्वाहा इदं गृहमात्रे न मम।

ॐ अन्पतेन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्रप्र दातारं

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे॥ ॐ अन्नपूर्णायै स्वाहा इदमन्नपूर्णायै न मम॥

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रुपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥ ॐ महालक्ष्म्यै स्वाहा इदं महालक्ष्म्यै न मम।

ॐ देवीर्द्वारऽ इन्द्रथं॑ सङ्घाते वीड्वीर्यामन्नवर्धयन्। आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणथं॑ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज॥ ॐ महारिष्टविनाशिन्यै स्वाहा इदं महारिष्टविनाशिन्यै न मम।

ॐ अम्बे अम्बिकेम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ चण्ड्यै स्वाहा इदं चण्ड्यै न मम॥

ॐ द्यौरासीत्पूर्वचित्तिरश्वऽ आसीद् बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला॥ ॐ द्यौराल्यै स्वाहा इदं द्यौराल्यै न मम।

ॐ वसोः पवित्रमसि शतधार वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेणा शतधारेण सुप्वा कामधुक्षः॥ ॐ वास्तुदेवाय स्वाहा इदं वास्तुदेवाय न मम॥

ॐ भूम्याऽ आखूनालभतेन्तरिक्षाय पाङ्क्त्रान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः॥ ॐ भूमिदेवाय स्वाहा इदं भूमिदेवाय न मम।

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ ॐ गैडुदेवाय स्वाहा इदं गैडुदेवाय न मम।

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये। यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि॥ ॐ

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ग्रामदेवाय स्वाहा इदं ग्रामदेवाय न मम।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ ॐ स्वर्गेन्द्राय स्वाहा इदं स्वर्गेन्द्राय न मम।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽअन्तरिक्षे ये दिवि तभ्येः सर्पेभ्यो नमः॥ ॐ पातालवासुकिभ्योः स्वाहा इदं पातालवासुकिभ्यो न मम।

ॐ मित्रो नऽ एहि सुमित्रधऽ इन्दस्योरुमा विश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनम्। स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्॥ ॐ मित्रलोकपालय स्वाहा इदं मित्रलोकपालाय न मम।

ॐ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳ स्वे दमे॥ ॐ मान्धत्रे स्वाहा इदं मान्धात्रे न मम।

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषाꣳ सहस्रयोजनेव धन्वानी तन्मसी॥ ॐ तीर्थराजाय स्वाहा इदं तीर्थराजाय न मम।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते॥ ॐ व्रतराजाय स्वाहा इदं व्रतराजाय न मम॥

ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे॥ ॐ पुनर्दिक्पालेभ्यः स्वाहा इदं पुनर्दिक्पालेभ्यो न मम॥

ॐ अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताᳮ सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ ॐ तिथिभ्यः स्वाहा इदं तिथिभ्यो न मम ॥

ॐ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहोरात्रेभ्यः स्वाहा धर्मासेभ्यः स्वाहा मासेभ्य स्वाहा ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳮ स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा-दित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ ॐ नक्षत्रेभ्यः इदं नक्षत्रेभ्यो न मम ।

ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे । सखायऽ इन्द्रमूतये ॥ ॐ योगेभ्यः स्वाहा इदं योगेभ्यो न मम ।

ॐ आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम् । परि वृङ्ग्धि हरसा माभि मᳮस्थाः शतायुषं कृणुहि चीयमानः ॥ ॐ वारेभ्यः स्वाहा इदं वारेभ्यो न मम ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाᳮसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ॐ करणेभ्यः स्वाहा इदं करणेभ्यो न मम ।

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥ ॐ वातेभ्यः स्वाहा इदं वातेभ्यो न मम ॥

ॐ वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

मेघेभ्यः स्वाहा इदं मेघेभ्यो न मम ॥

ॐ समुद्द्रङ्गच्छ स्वाहान्तरिक्षङ्गच्छ स्वाहा देवᳲसवितारङ्गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छन्दाᳲसि गच्छ स्वाहाद्द्यावापृथिवी गच्छ स्वाहा यज्ञङ्गच्छ स्वाहा सोमङ्गच्छ स्वाहा दिव्यन्नभो गच्छ स्वाहाग्निं वैश्वानरङ्गच्छ स्वाहा मनो मे हार्द्दियच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनाऽऽपृण स्वाहा ॥ ॐ समुद्रेभ्यः स्वाहा इदं समुद्रेभ्यो न मम ॥

ॐ नदीभ्यः पौञ्जिष्ठ मृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्यऽ उन्मत्तᳲ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितव मीर्यतायाऽ अकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ॐ नदिभ्यः स्वाहा इदं नदीभ्यो न मम ।

ॐ इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः । तस्य नऽ इष्टस्य प्रीतस्य द्रविणेहागमेः ॥ ॐ इष्टदेवाय स्वाहा इदमिष्टदेवाय न मम ।

अब आज्यथाली (मानो) मा घिउ थप्ने–

ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृहन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ॐ कुलदेवताय स्वाहा इदं कुलदेवताय न मम ॥

अब यहाँ (यजमान) कर्ताको कुलदेवताको नाममा ५४ पटक घिउ चरुले होम गर्ने :–

ब्राह्मणले– ॐ कुलदेवताय स्वाहा....... भन्ने ॥
कर्ताले– घिउ चरुले हवन गर्ने ॥

यत्र स्थान विशेषाधिष्ठितो यो देवी देवो वा तत्तन्त्रेण होमयेत्–

अब जुन ठाउँमा होम गर्न लागिएको हो त्यस ठाउँका अधिष्ठात्री

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

देवीदेवतालाई **विशेषका देवताको नाउँमा** *त्यही मन्त्रले होम गर्नेः (घिउ र चरु सहित)*

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ ॐ भैरवाय स्वाहा इदं भैरवाय न मम।

ॐ देवीर्द्वारऽ इन्द्रथ्ं सङ्घाते वीड्वीर्यामन्नवर्धयन्। आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणथ्ं रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज॥ ॐ भैरव्यै स्वाहा इदं भैरव्यै न मम॥

ॐ अम्बेऽअम्बिकेम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ विन्ध्यवासिन्यै स्वाहा इदं विन्ध्यवासिन्यै न मम॥

अब तलको मन्त्रले सबै देवतालाई घिउ चरुले होम गर्ने–

ॐ एषो ह देवः प्रदिशोनु सर्वाः पूर्वो श जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥ ॐ सर्वेभ्योः देवभ्योः स्वाहा इदं सर्वेभ्यो देवेभ्यो न मम।

यसमन्त्रले सर्वहोम पूर्णार्थ एक आहुति दिनु– (पीपलको पातको खोचो बनाई शुक्रज्योतिलाई ३ पटक हवन गर्ने)

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च। शुक्रश्च ऋतपाश्चात्यथ्ं हाः स्वाहा॥ ॐ सर्वहोमपूरणार्थेभ्यः स्वाहा इदं सर्वहोमपूरणार्थेभ्यो न मम।

पाँच पाण्डवलाई हवन गर्नु–

ॐ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानथ्ं स्वे दमे॥ ॐ पञ्चपाण्डवेभ्यः स्वाहा इदं पञ्चपाण्डवेभ्यो न मम।

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

भीमसेनलाई हवन गर्नु-

ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा॥ ॐ भीमसेनाय स्वाहा इदं भीमसेनाय न मम।

यसमन्त्रले सम्पूर्ण पितृहरुलाई हवन गर्नु-

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम्॥ ॐ पितृभ्यः स्वाहा इदं पितृभ्यो न मम। अत्र प्रणीतोदशस्पर्शः। (सुरोलाई प्रणीतापात्रको जलमा चोभ्ने र उपजेवनमा पुछ्ने)

अब तलका तीन मन्त्रले वैश्वानर (अग्नि) लाई हवन गर्ने :-

यसमा पनि स्वाहा भनेपछि घिउ चरु यज्ञकुण्डमा हवन गर्ने)

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे। उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥ ॐ वैश्वानराय स्वाहा इदं वैश्वानराय न मम।

ॐ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण। उपयामगृहीतासि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥ ॐ वैश्वानराय स्वाहा इदं वैश्वानराय न मम।

ॐ वैश्वानरो नऽ ऊतयऽ आ प्र यातु परावतः। अग्निरुक्थेन वाहसा। उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॐ वैश्वानराय स्वाहा इदं वैश्वानराय न मम।

यसपछि तलका ३ मन्त्रले हवन गर्नु-

ॐ आकाशे यानि तीर्थानि यानि तीर्थानि भूतले। पाताले यानि तीर्थानि सर्वतीर्थ नमोऽस्तु ते स्वाहा॥

ॐ आकाशे सन्ति ये देवा ये देवाः सन्ति भूतले। पाताले सन्ति ये देवाः सर्वदेव नमोऽस्तु ते स्वाहा॥

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ आकाशे यानि लिङ्गानि लिङ्गानि यानि लिङ्गानि भूतले । पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तु ते स्वाहा ॥

ततो हुतशेषहविर्द्रव्यं गृहीत्वा ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात्- *(अब होम गरेर बाकी रहेको चरुले स्विष्टकृत्[1] होम गर्ने)*

ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ॥

सुरोमा बाकी रहेको घिउ पातमा पुछेर कर्ताले प्रासन[1] गरी त्यसपछि आचमन गर्न लगाउने -

अब घिउद्वारा महाव्याहृत्यादि[2] उत्तराङ्गहोम गर्नुः *(प्रजापति होमको अन्तमा उत्तराङ्ग होम गर्ने, यस्तो होम गर्दा घिउले मात्र गर्ने)*

ॐ महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता यागत्र्युष्णिगनुष्टुभश्छन्दांसि अग्न्याधाने विनियोगः ॥

ॐ भूः स्वाहा इदमग्नये न मम । प्रोक्षणीपात्रेऽपि । *(यसपछि सुरोमा बाकी रहेको घिउ प्रोक्षणी पात्रमा पनि हाल्ने गर्नुपर्छ)*

ॐ भुवः स्वाहा इदं वायवे न मम ॥ प्रोक्षणीपात्रेऽपि । *(यसपछि सुरोमा बाकी रहेको घिउ प्रोक्षणी पात्रमा पनि हाल्ने गर्नुपर्छ) (सुरोमा बाकी रहेको घिउ प्रोक्षणीपात्रमा पनि हाल्ने)*

ॐ स्वः स्वाहा । इदं सूर्य्याय ॥ प्रोक्षणीपात्रेऽपि । *(सुरोमा बाकी रहेको घिउ प्रोक्षणीपात्र पनि हाल्ने) यति महाव्याहृतिहरुको होम भयो ॥*

अब विनियोग मन्त्र पढेर अग्निवरुणलाई हवन गर्नु-

ॐ त्वन्नोऽअग्न इति बामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द आज्यहोमे विनियोगः ॥ ॐ त्वन्नोऽअग्ने व्वरुणस्य

---

[1] *स्विष्टकृत् भन्नाले-प्रत्येक गृह्यकर्ममा अग्निको मुखमा त्यसरी घिउ हालिन्छ जसको धारा उत्तराभिमुख हुन्छ । यो धारा इच्छागरेको सिद्ध गर्ने हुन्छ । त्यस्तो बेलाको अग्निलाई वृहस्पतिको छैटौं छोरा मानिन्छ। (स्रोतः संस्कृत नेपाली वृहत् शब्दकोश)*

[1] *प्रासन भन्नाले खानु हो तापनि यहाँ अलिकति ओठमा लगाउने वा जिव्राको टुप्पाले चाट्नुलाई संभनुपर्छ।*

[2] महाव्याहृति भन्नाले- ॐ भूः ॐ भूवः ॐ स्वः यी तीनलाई भनिन्छ। *(सं. कोश पृ. ९८४)*

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

विद्वान् देवस्य हेडोऽ अवयासिसीष्ठाः । यजिष्ठो व्वन्हितमः व्विश्वा द्वेषाꣳसि प्रमु मु ग्ध्यस्मत् ॐअग्निवरुणाभ्याम् स्वाहा इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ॥ *(सुरोमा बाकीरहेको घिउ प्रोक्षणीपात्रमा हाल्ने)*

फेरि विनियोग मन्त्र पढेर अग्निवरुणलाई हवन गर्नु–

ॐ स त्वन्नोऽअग्न इति बामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द आज्यहोमे विनियोगः ॥ ॐ स त्वं नो अग्नेवमो भवोती नेदिष्ठोऽ अस्याऽ उषसो व्व्युष्टौ। अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहावो नऽ एधि॥ ॐ अग्निवरुणाभ्याम् स्वाहा इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ॥ *(सुरोमा बाकीरहेको घिउ प्रोक्षणीपात्रमा हाल्ने)*

तलको मन्त्रले अग्निलाई घिउको मात्र आहुति दिनु–

ॐ अयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः प्रायश्चित्तहोमो विनियोगः ॥ ॐ अयाश्चाग्नेऽस्यनभिशस्ति पाश्च सत्यमित्वमयाऽ असि । अया नो यज्ञं व्वहास्यया नो धेहि भोषजꣳ स्वाहा ॥ ॐ अग्नये स्वाहा इदमग्नये न मम प्रोक्षणीपात्रेऽपि ॥ *(सुरोमा बाकीरहेको घिउ प्रोक्षणीपात्रमा हाल्ने)*

तलको मन्त्रले सूर्य, विष्णु, विश्वदेव, मरुत र अर्कलाई आहुति दिनु–

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वदेवा मरुतः स्वर्का देवताः प्रायश्चित्तहोमे विनियोगः । ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा व्वितता महान्तः तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥ ॐ वरुणायसवित्रे विष्णवे विश्वेभ्योदेवेभ्यो मरुद्भ्यः स्वर्क्केभ्यो स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । प्रोक्षणीपात्रेऽपिः । (सुरोमा बाकीरहेको घिउ प्रोक्षणीपात्रमा हाल्ने)

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

तलको मन्त्रले वरुणलाई हवन गर्नु–

ॐ उदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः । ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳश्रथाय । अथा व्वयमादित्यव्व्रते तवानागसोऽ अदितये स्याम स्वाहा ॥ ॐ वरुणाय स्वाहा इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपिः ॥ *(सुरोमा बाकीरहेको घिउ प्रोक्षणीपात्रमा हाल्ने)*

तलको मन्त्रले प्रजापतिलाई मनमनै एक आहुति दिनु–

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ।

होता (कर्ता)ले कुश पानी लिई सङ्कल्प लिने :

ॐ अद्येत्यादि पूर्वसङ्कल्पसिद्धिरस्तु मम कृतस्यामुक कर्मणाः साङ्गतासिद्ध्यर्थं स्थापितदेवतानां पूर्णाहुतिं होमयिष्ये ॥ *भनि छोडि दिने ॥*

अथ पूर्णाहुति होम:- *कर्ताले जटासहितको नरिवल कपडा हातमा लिई पूर्णाहुति गर्ने ।*

अब सुरोमा सिङ्गो सुपारी घिउ समेत राखी तलको मन्त्रले पूर्णहुति गरेर अग्निमा होम गरिदिने–

ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृतऽ आ जातमग्निम् । कविꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्ज नयन्त देवाः स्वाहा ॥

स्रुवपूजनम्- *अब सुरोको पूजा गर्ने : (यसको लागि फूल, सुपारी, अक्षता, फल, फूल र वस्त्र समेत तयार गरी हातमा लिने ।)*

ॐ स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेधिषवणे च मे पूतभृच्च मऽ आधवनीयश्च मे वेदिश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

मे बर्हिश्च मेवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

पूर्णपात्र:- *होमगर्दा छुटफूटकर्म पूराहोस् भनी दान गर्न फल द्रव्य र २५६ मुठी (तीन पाथी १ माना ६ मुठी) चामल, डालो, प्याङ् वा टपरी कुनै पात्रमा हालेर जनै, वस्त्र, सुपारी, द्रव्यहरु समेत राखेर ब्रह्मालाई दिइने एक प्रकारको आमान्न दक्षिणालाई पूर्णपात्र भनिन्छ।*

अब पूर्णपात्र तयार गर्ने र तलको मन्त्रले पूर्णपात्र गर्ने :-

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । व्वस्नेव व्विक्रीणावहाऽइषमूर्ज्जं शतक्रतो ॥

अब तिल कुश पानी लिई पूर्णपात्रलाई हातमा लिने र तलको सङ्कल्प भन्ने :-

ॐ अद्येत्यादिदेशकालौ समुच्चार्य अमुककर्माङ्गभूतहोम कर्मणी कृताकृतावेक्षणरुप ब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं यथानाम गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ *भनि पूर्णपात्र ब्राह्मणलाई दिने र ब्राह्मणले स्वस्ति भनिदिने) ॐ स्वस्तिति प्रतिवचनम् ॥*

पवित्रसहित प्रणीताको जलले यजमानलाई शिरमा घुमाई प्रणीता विमुक गर्ने र तलको मन्त्र भन्ने:-

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु । ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च व्वयं द्विष्मः ॥ *यस मन्त्रले प्रणीतापात्रलाई ईशान तर्फ घोप्ट्याइ दिने । यसपछि अग्निको वरिपरि ओछ्याएको कुशलाई ओछ्याएकै क्रमले झिकीघिउमा चोबेर तलको मन्त्रले आगोमा होमीदिने ॥*

ॐ देवा गातुविदो गातुं व्वित्त्वा गातुमित । मनसस्पतऽइमन्देव यज्ञं स्वाहा व्वाते धाः स्वाहा ॥

महाबलि:

ततो आचार्य माषतण्डुलाद्यन्नकुङ्कुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं बलिं क्षेत्रपालाय दद्यात् तत्र मन्त्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

(क्षेत्रपालको लागि मास, चामल, अन्न, कुमकुम, चन्दन रातो फूल बलेको दियो, दक्षिणा, जल राखी पूजा गर्ने):-

ॐ क्षेत्रपालाय भूतप्रेत पिशाच राक्षसशाकिनीडाकिनी वेतालादिपरिवारयुताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल, इमं बलिं गृहाण, मम यजमानस्य आयुः कर्ता, क्षेमकर्ता, वरदस्तुष्टिदो भव ॥ *भनि यस मन्त्रले कर्ताको शिरमा घुमाई दोबाटो/चौबाटोमा लगेर फालि दिने । फाल्ने मानिस पाएसम्म शूद्र भएमा उत्तम हुन्छ । यदि ब्राह्मण वा अरु कसैले फाल्न गएमा आएपछि हात पाउ धुने गर्नु । पुरोहित आफै गएमा हात पाउ धोएर आचमन गर्नुपर्छ ।)*

यज्ञान्तगोदानम्– *(यज्ञको अन्तमा गोदान गर्ने)–(संक्षिप्त)*

कर्ता अग्निको पश्चिम दिशामा बसी पूर्वफर्कने:–

गाई सम्झेर दुना/बोहोतामा रुपैया राखि गाईलाई ३ पटक पूजा गर्ने र ब्राह्मणले तलको मन्त्र पढ्ने :

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः । ॐ इरावती धेनुमतीहि भूतꣳसूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी व्विष्णवे ते दाधर्थप्यृथिवीमभितो मयूखैः स्वाहा ॥

ब्राह्मणलाई ३ पटक पूजागर्ने:–

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् । (यर्जु. ३४।३१) *(ब्राह्मणलाई तीनपटक पूजागर्ने)*

तलको मन्त्रले तर्पण दिने–

ॐ मनोंमेतर्पयत, वाचम्मेतर्पयत, प्राणम्मेतर्पयत, चक्षुर्मेतर्पयत, श्रोत्रम्मेतर्पयतात्मानंमेतर्पयत, प्रजां मे तर्पयत पशून्मे तर्पयेत, गणान्मे तर्पयत ॐ गणा मे मा वितृषन् ॥

कर्ताले जलसहित कुशका तीनटुक्रा जौ, तिल र जललिएर दुना वा बोहोतालाई छोड्राख्ने र ब्राह्मणले गोदान संकल्प भन्ने–

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

हरिः ॐ तत्सत् ३ः ॐ विष्णुः ३ इत्यादि देशकालौ स्मृत्वा अमुक गोत्रः, अमुक शर्मा अहं मम इह जन्मनि कायिक, वाचिक, मानसिक कृतकर्म दोषनिरासद्वारा त्रिविध तापोऽपशमनार्थ यथालब्धोपचारैः कृतस्य पूजनहवनकर्मणः यथोक्त फलप्राप्तिपूर्वक अमुकदेवता प्रीतये इमां गां रुद्रदेवतां तत्प्रत्याम्नायीभूतं द्रव्यं रजतं चन्द्रदैवतं, ताम्रं सूर्यदैवतम् यथा नामगोत्राय शर्मणे ब्राह्मणाय इदं यज्ञान्त गोदानत्वेन तुभ्यं अहं संप्रददे ॥ *(भनी ब्राह्मणलाई कुशको टुक्रा हातमा राखि दिने)*

फूलअक्षता लिएर गाईको प्रार्थना गर्ने–

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि । सर्वदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे ॥ ॐ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ (यसपछि यजमानलाई जलले सेचन गरिदिनुपर्छ।

अब आफूले अर्पण गरेको पैसालाई भुइँमा राखी फूलअक्षताले पूजा गर्नेः

ॐ स्वर्ण धर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्य स्वाहा ॥ *भनी पूजा गर्ने।*

त्यसपछि कुशको टुक्रा लिएर संकल्प गरिएको पैसालाई हातमा उचाल्ने–

ॐ अद्यकृतैतत् गोदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां दक्षिणां यथा नामगोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥

अब ब्राह्मणले **ॐ स्वस्ति इति प्रतिवचनम्** *भनी गोदान प्रतिष्ठा लिनू।*

जलले प्रदक्षिणा गर्दै मन्त्र भन्ने–

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

ब्राह्मणले तीन्टुक्रा कुशलिई जलले अभिषेक गारिदिने–

ॐ कोदात्कस्मा ऽअदात्कामोदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते। *भनी ब्राह्मणले लिने तलको मन्त्रले स्वस्तिवाचन गर्ने–*

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

ॐ द्यौः शान्तिरन्तरिक्षॐ शान्तिः पृथिविशान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वॐशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ सुशान्तिर्भवतु ॥

भूयसीदक्षिणा• : *(विसर्जन गर्नका लागि भूयसीदक्षिणा लिई तलको मन्त्र पढ्ने)*

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो । अनन्तपुण्य-फलदमतः शान्तिं प्रयच्छ मे ॥

अब कर्मपात्रको पानी हातमा लिने र दक्षिणालाई उचाल्ने र ब्राह्मणले तलको सङ्कल्प भन्ने :

ॐ पूर्व संकल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्यामुककर्मणे अमुकदेवताप्रीतये कृतस्य देवतापूजनहवनादिकर्मणः न्यूनातिरिक्ततापरिपूर्तिपूर्वकं यथोक्त फलप्राप्त्यर्थमिदं दक्षिणाद्रव्यममुकदैवतं नानानाम गोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्य यथाकाले दातुमहमुत्सृजे ॥ *भनी राख्ने ॥*

सिधा (सिद्धान्न)*° *दान विधि*:- *(अमान्न) *सिधा दान गर्ने भएमा सिधादानलाई पूजागर्ने र कुश, जौ, तिल पानी लिई छुने र सामान्य सङ्कल्प भन्ने ।*

ॐ तत्सद्विष्णुरित्यादि पूर्व संकल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्यामुककर्मणे .... भनी दान गर्ने ।

मेधाकरणम्-

(अब मेधा गर्न जौ, तिल, कुश पानी हातमा लिने र सङ्कल्प लिने-

ॐ अद्येय इत्यादि कृतस्य अमुक अमुक भूतहोमादि कर्मणः परिपूर्णता सिद्ध्यर्थ मेधाकरणार्थं होम करिष्ये ॥

• *पूजायज्ञ आदिको समाप्तिमा ब्राह्मणहरु र कन्यालाई दिइने दक्षिणा नै भूयसीदक्षिणा हो । (सं. ने.बृ. शब्दकोश १२१)*

° *सिधा (अमान्न)- विशेष पर्वमा ब्राह्मणलाई दान दिइने दाल, चामल, आदि काँचो अन्न -ने. सं. बृ. शब्दकोश पृ. १३४८ ।*

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

सुरोमा नरिवल, सुपारी, फल, चन्दन फूल र वस्त्र समेत राखेर लिने घिउको धारा लगाउदै प्रज्ज्वलित अग्निमा आहुति दिनुः–

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषᳪ स्वाहा॥

ॐ यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥

ॐ आकूतिमग्निं प्रयुजᳪस्वाहा मनो मेधामग्निं प्रयुजᳪ स्वाहा चित्तं विज्ञातमग्निं प्रयुजᳪस्वाहा वाचो विधृतिमग्निं प्रयुजᳪ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा॥

ॐ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा॥

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । व्वस्नेव व्विक्रीणावहाऽइषमूर्ज्जᳪ शतक्रतो॥

ॐ इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्। मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥ भनि अग्निमा हालि दिने॥

उपजेवन हवन गर्ने– *(कर्ताले मात्र चरु लिएर हवन गर्ने)*

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि। समाववर्ति पृथिवी समुषाः समु सूर्यः। समु विश्वमिदं जगत्। वैश्वानरज्योतिर्भूयासं विभून् कामान् व्यश्नवै ·भूः स्वाहा॥ भनि अग्निमा चढाई दिने।

शेषचरुहोमः *अब कर्तालगायत सपरिवार, बन्धुवर्गले हातमा चरु, वस्त्र, चन्दन, फलफूल लिने र ब्राह्मणले तलको मन्त्र पढेपछि यज्ञमा होम गरिदिने –*

ॐ अभ्या दधामि समिधमग्ने व्रतपते त्वयि। व्रतञ्च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम्॥ ॐ यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

चरतः सह। तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना। ॐ यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह। तँल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते स्वाहा॥ *अब अग्निमा चढाइ दिने।*

अब सुरोले तिलक भष्म अलिकति लिएर बाकी रहेको घिउमा पिध्ने र छोएर तलको मन्त्र पढ्ने–

ॐ अग्नये गायत्राय त्रिवृते राथन्तरायाष्टकपालऽ इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविँशाभ्यां वैराजाभ्यांपयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्रऽ औष्णिहाय त्रयस्त्रिँशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोनुमत्याऽ अष्टकपालः॥

अब तलको मन्त्र पढी यजमान(कर्ता)लाई तिलक लगाइदिनेः–

ॐ त्र्यायुषञ्जमदग्नेः। इति ललाटे। *निधारमा लगाइदिने।* ॐ कश्यपस्य त्र्यायुषम्। इति ग्रीवायाम् *(घाँटीमा लगाइदिने।)* ॐ यद्देवेषु त्र्यायुषम्। *दाहिने हातको कुममा लगाइदिने।* ॐ तन्नोऽअस्तु त्र्यायुषम् *भनि हृदयमा लगाइदिने॥*

घृतच्छाया निरीक्षण गर्ने- *अब यजमानले घृतछायाँमा निरीक्षण गरेर ब्राह्मणलाई दिँदा निम्नक्रम पुऱ्याउनुपर्छ।*

चाँदीको भाँडो, काँशको भाँडो, तामाको भाँडो जुनमा बनाए पनि हुन्छ। यसमा घिउ दूवो, सुनको प्रतिमा र पैसा हालेर तलको मन्त्र पढी घिउको छायाँ हेर्नेः

ॐ तेजोसि शुक्रममृतमायुष्पाऽ आयुर्मे पाहि। देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे॥ ॐ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात्। घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

अब घिउलाई छोएर तलको मन्त्र पढ्ने :

ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् । तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥ ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् । आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥ ॐ नभोऽन्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम् । सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥

अब चोखो ठाउँको दूबो लिई तलको मन्त्र पढ्दै चलाउने:-

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥ ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा । तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोबलम् ॥

अब कुश तिल जल लिई आज्यपात्र (घिउ)लाई लिई सङ्कल्प पढ्ने:-

ॐ अद्येत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपशमन पूर्वकमसमानतेजः प्रज्ञाशौर्य यशोबलायुर्लक्ष्मीपुष्टिवर्धनार्थमिद-माज्यं मृत्युञ्जयदैवतं (रौप्यं ताम्रं वा) **कांस्यपात्रं चन्द्रदैवतं सुवर्णमग्निदैवतं** (अमुक) **गोत्राय** (अमुक) **शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥** भनेर ब्राह्मणलाई दिने र हात जोडी प्रार्थना गर्ने ।

अब प्रार्थना गर्ने :-

ॐ कामधेनु समुद्भूतं देवानामुत्तमं हविः । आयुर्वृद्धिकरं दातृ राज्यं पातु सदैव माम् । ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।

अब निराजन आरती गर्ने :

कर्ताले आफ्ना बन्धुवर्गसहित यानिकानी० गर्दै यज्ञको परिक्रममा गर्नु:)

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणः पदेपदे ॥ *(जन्मजन्मान्तरमा गरिएका जुनसुकै पापहरू भए पनि । प्रदक्षिणाको पाउपाउमा सबै पापहरु नासिऊन् ।)*

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri Funding:

अर्घ विमुक्त गर्ने- *(यज्ञमा अर्घ निवेदन गर्ने)*-

कुन देवताको आवाहन थियो त्यहीं माथि अर्घ घोप्ट्याई पूजागर्ने र अर्घ उठाई पहिलाको ठाउँमा राखी वींड भएको केरा राखी पानी भरी त्यही पूजागर्ने-

ॐ स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृतऽ ओषधीषु। चित्रः शिशुः परि तमाᳬंस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥

विशेषाअर्घ दद्यात्- ॐ जातो दैत्यवाधार्थाय देवानां पालनाय च । तस्मै देवाय सत्याय सगुणाय महात्मने । व्यक्ताव्यक्तस्वरुपाय हृषीकपतये नमः ॥ गृहाणार्घ्यं मयदा दत्तं रमया सहित प्रभो ॥

क्षमापनम्- ॐ त्राहि मां सर्वग श्रीश हरे संसारसागरात् । पुष्कराक्ष निमग्नोऽहं मायाविज्ञानमत्सरात् ॥ त्राहि मां देवदेवेश त्वत्तो नास्तीह रक्षिता ॥

इत्यर्घ्यं निवेद्य शङ्खजलं निवेदयेत्- ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् । निवेददितं च नैवेद्यं गृहाण चानुकम्पया ॥ मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ साधु वासाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं क्षम्यतां देव गृहाण परमेश्वर ॥ इत्यर्घ्यं पराङ्मुखं कृत्वा- ॐ अर्घ्यपात्राय नमः । ॐ शङ्खपात्राय नमः ।

कर्ताले ब्रह्मलाई उठाईदिने र फूल अक्षता चढाई विसर्जन गर्न तलको मन्त्र पढ्ने :-

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्र यन्तु मरुतः सुदानवऽ इन्द्र प्राशूर्भवा सचा॥ ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च । ॐ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ ॐ आवाहनं न जानामि न जानामि

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

विसर्जनम् । पूजां चैव नजानामि क्षमस्व परमेश्वर ॥ *भनी फूल अक्षता चढाईदिने ।*

अभिषेक मन्त्रः-

(अब स्थापित गरिएका कलशको जल लिएर यजमानहरुलाई तलको मन्त्र पढ्दै मंगल अभिषेक गरिदिनु । पहिले पौराणिक मन्त्र पढ्नु र पछि वैदिक मन्त्रहरु पढ्नु ॥

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वरा ।
वासुदेवो जगन्नाथ स्तथा सङ्कर्षणे विभुः ॥ १॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥२॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥३॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥४॥
पञ्चदेवाश्च योगाश्च करणानि च वासशः ।
एतास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥५॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मनवो गावो देवमातर एव च ॥६॥
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसो गणाः ।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥७॥
औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥८॥
विश्वब्रह्माण्डदेवाश्च सलोकाः सचराचराः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥९॥

अब वैदिक मन्त्रहरु

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्ये-न्द्रियेणे बलाय श्रियै यशसेभिषिञ्चामि ॥

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri. Funding:

ॐ कोसि कतमोसि कस्मै त्वा काय त्वा। सुश्लोक सुमङ्गल सत्यराजन्॥ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणो अमृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम्॥

ॐ जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः। मोदाः प्रमोदाऽ अङ्गुलीरङ्गानि मित्रं मे सहः॥

ॐ बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म वीर्यम्। आत्मा क्षत्रमुरो मम॥

ॐ पृष्टीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी। ऊरू अरत्नी जानुनी विशो मेङ्गानि सर्वतः॥

ॐ नाभिर्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत्। आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः। जङ्घाभ्यां पद्भ्यां धर्मोस्मि विशि राजा प्रतिष्ठितः॥

ॐ प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्येश्वेषु प्रति तिष्ठामि गोषु। प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे॥

ॐ त्रया देवाऽ एकादश त्रयस्त्रिꣳ शाः सुराधसः। बृहस्पतिपुरोहिता देवस्य सवितुः सवे। देवा देवैरवन्तु मा॥

ॐ प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳ षि सामभिः सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्काराऽ आहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा॥

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ (शु.य. ३६/१७)

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ (शु.य. ३६/२४)

ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतर्दधातु ॥ (शु.य. २५/१९)

ॐ विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्नऽ आ सुव ॥ (शु. य. ३०/३)

ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्यः। ब्रह्मराजन्याभ्याᳫं शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ (शु.य. २६/२)

प्रसादग्रहणम्:(पाति पद्ने):– *अब फूलप्रसाद टीका हातमा लिइ अभिमन्त्रण गर्ने)–*

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ (यजु. २२/२२)

ॐ दीर्घायुस्तऽ ओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वं दीर्घायुर्भूत्वा शतवल्शा व्विरोहतात् ॥ (यजु. १२/१००)

ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ (यजु. १२/४४)

ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाᳫं रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥(यजु. ३९/४)

ॐ आयुष्यं वर्चस्यᳫं रायस्पोषमौद्भिदम्। इदᳫं हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ॥ (यजु. ३४/५०)

ॐ न तद्रक्षाᳫंसि न पिशाचास्तरन्ति देवानामोजः प्रथमजᳫं ह्येतत्। यो बिभर्ति दाक्षायणᳫं हिरण्यᳫं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ (यजु. ३४/५१)

यी मन्त्रले अक्षताहरु कुलदेवता पितृदेवता र स्थानीय देवतालाई चढाई कर्तालाई धुप बत्ती गराउने।

अब कायन बाचा गर्ने–

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात्। करोमि यद्यत्सकलं परस्मै नारायणायेति

epal Sanskrit University, Balmeeki Campus, Kathmand

In Public Domain. Digitization by eGangotri.Funding:

समर्पयेतत् ॥ *भनि छोडिदिने गर्नु।*

अब भगवान् अच्युतलाई संझेर नमस्कार गर्नेः-

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ ॐ अच्युताय नमः ३ *पटक भनी नमस्कार गर्ने।*

तलको मन्त्रले जुम्लाहात गर्ने-

ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मेविष्णुः प्रसीदतु ॥ ॐ विष्णवे नमः ३ ॥ यत्कृतं कर्मतन्यू नातिरिक्तं भगवद्वचनात् सर्वं परिपूर्णमस्तु ॥ ॐ अस्तुपरिपूर्णम् ॥

तिलककरणम्: *(तिलक लगाउदा भन्ने मन्त्र)-*

ॐ त्र्यायुषञ्जमदग्नेः । इति ललाटे *(निधारमा लगाउने)।* **ॐ कश्यपस्य त्र्यायुषम् । इति ग्रीवायाम्** *(घाँटीमा लगाइदिने ।)* **ॐ यद्देवेषु त्र्यायुषम् ।** *दाहिने हातको कुममा लगाइदिने।* **ॐ तन्नोऽअस्तु त्र्यायुषम्** *भनि हृदयमा लगाइदिने ॥*

टीकाग्रहण आशिर्वाद मन्त्र-

ॐ स्वस्तिस्तुते कुशलमस्तु चिरायुरस्तु । गोवाजि-हस्तिधनधान्यरस्तु ॥ ऐश्वर्यमस्तु विजयस्तु रिपुक्षयस्तुः । सन्तानवृद्धिःसहितंहरिभक्तिरस्तु ॥ निवसतु तव गृहे निश्चला सिन्धुपुत्री । प्रविसतु भुजदण्डे कालिका वैरी हन्ती ॥

ॐ श्रीर्वर्चस्व मायुष्यमारोग्यमाविद्यात्पवमानं महीपते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ मन्त्रार्थः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदय-स्तव ॥

लक्ष्मीस्ते पङ्कजाक्षी निवसतु भवने भारती कण्ठदेशे, वर्धन्तां बन्धुवर्गाः सकलरिपुगणा यान्तु पातालमूलम् । देशे देशे च कीर्तिः

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

प्रभवतु भवतां कुन्दपूर्णेन्दुशुभ्रा । जीव त्वं पुत्रपौत्रैः सकलगुण युतैर्भोक्षसे राजलक्ष्मीः ॥ शुभमस्तु, कल्याणंमस्तु ॥

रक्षाबन्धनम्: *(अब रक्षाबन्धन गर्दै तलको मन्त्र पढ्ने)–*

ॐ येनबद्धो बलीराजा दानवेन्द्रो महाबलः । तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल । ॐ त्वां यविष्ठ्य दाशुषो नॄँः पाहि श्रृणुधि गिरः । रक्षा तोकमुतत्क्मना ॥

त्यसपछि यजमान (कर्ता)ले मण्डपका सामग्रीहरु ब्राह्मणलाई सुम्पिनु र जलले उत्सर्ग गर्ने :-

अब ब्राह्मणहरुलाई मेरो कर्म पूर्ण भयो भनेर सोध्ने र पूर्ण भयो भनेपछि प्रसादहरु बन्धुवर्गहरुलाई ग्रहण गराउने तृप्ति हुनेगरी भोजन गराउने ।

॥ इति अग्निस्थापनविधि समाप्त ॥

शण्डामर्कहोम विधि[1]

(नामकरण संस्कारका लागि)

नामकरण (न्वारन) गर्दा चतुस्वस्ति पुगेपछि यस हवन गर्नुपर्छ । शण्डमर्क होममा नाम सुनाउने काम सकिएपछि चामलको कनिका र सरस्यूँ भलायो र बेलको काँढा मिसाई शण्डामर्क आलिखन यी दुई मन्त्रले जन्मदिनदेखि दशदिनसम्मको प्रत्येक दिनको दुई आहुतीका दरले २० आहुति सम्म हवन गर्नु । प्रथम आहुति विनियोग सहित मन्त्र पढेर दिनु र त्यसपछि दोस्रो आहुतिमा पनि विनियोग र मन्त्र पढेर दुईपटक हवन गर्नु । यसमा घिउ पनि हवन गर्नुपर्छ ।

ॐ शण्डामर्क इति प्रजापतिऋषिरनुष्टुपछन्दः शण्डामर्कदेवता फलीकरणमिश्रसर्षपहोमे विनियोगः ।

ॐ शण्डामर्कउपवीर शौण्डिकेय उलूखलः मलिम्लुचो द्रोणासश्च्यवनोनस्यतादितः स्वाहा ॥ इदं शण्डामर्काय उपवीराय शौण्डिकेयाय उलूखलाय मलिम्लुचाय द्रोणेभ्यश्च्यवनाय न मम ॥ *भनी प्रथम पटक हवन गर्ने ।*

---

[1] *शण्ड र मर्क नामगरेका दैत्यका गुरु (शुक्राचार्यका पुत्र)लाई शण्डामर्क भनिन्छ ।* (स्रोत: संस्कृत शब्दकोश)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

फेरि :-

ॐ आलिखन्निति प्रजापतिर्ऋषिरनुष्टुपछन्दः आलि-खतादेवता फलीकरणमिश्रसर्षपहोमे विनियोगः। ॐ आलिखन्ननिमिषः किंवदन्त उपश्रुतिः हर्यक्षः कुम्भी शत्रुः पात्रमाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणिच्यवनो नश्यतादितः स्वाहा ॥ इदमालिखतेऽनिमिषाय किंवदद्भ्य उपश्रुतये हर्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हन्त्री-मुखाय सर्षपारुणाय च्यवनाय न मम इति ॥

॥ इति शण्डामर्क हवनम् ॥

अथ श्रीनारायणकवच *(श्रीमद्भागवत स्कन्ध ६, अ. ८ बाट)*

॥ राजोवाच ॥

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान्।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥१॥
भगवंस्तन्माख्याहि वर्म नारायणात्मकम्।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥२॥

॥ श्रीशुक उवाच ॥

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते।
नारायणाख्यं वर्माह तदिहैकमनाः श्रृणु ॥३॥

॥ विश्वरुप उवाच ॥

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचि ॥४॥
नारायणमयं वर्म संनह्येद् भया आगते।
पादयोर्जानुनोरुर्वोरुदरे हृद्यथोरसि ॥५॥
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत्।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६॥
करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया।
प्रणवादियकारान्तमङ्गुल्यङगुष्ठपर्वसु ॥७॥
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि।
षकार) तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥८॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ॥९॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत्।

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

ॐ विष्णवे नम इति ॥१०॥

आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥११॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचाप पशान् दधानोऽष्टगुणोऽष्टबाहुः ॥१२॥
जलेषु मां रक्षतु मत्स्यमूर्ति यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरुपः ॥१३॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१४॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वाराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥१५॥
मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात् ॥१६॥
सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥१७॥
धन्वन्तरिर्भगवान् पात्वपथ्याद् द्वन्द्वाद् भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद् बलो गणात् क्रोधवशादहीन्द्रः ॥१८॥
द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥१९॥
मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥२०॥
देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषिकेश उतार्धरात्रे निशीथ एकाऽवतु पद्मनाभः ॥२१॥
श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥२२॥
चक्रं युगान्तनलतिग्मनेमि भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥२३॥
गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कुष्माण्डवैनायकयक्षरसो भूतग्रहांश्चूर्णय चूर्णयारीन् ॥२४॥
त्वं यातुधानप्रमथप्रतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥२५॥
त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

चक्षूंषि चर्मञ्छतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥२६॥
यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥२७॥
सर्वाण्येतानि भगवन्नामरुपास्त्रकीर्तनात्।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥२८॥
गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥२९॥
सर्वापद्भ्यो हरेर्नामरुपयानायुधानि नः।
बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षदभूषणाः ॥३०॥
यथा हि भगवानेव वस्तुतः सदसच्चयत्।
सयेनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥३१॥
यथैकात्म्यानुभावानं विकल्परहितः सवयम्।
भूषणायुधलिङ्गाख्य धत्ते शक्तीः स्वमायया:॥३२॥
तनैव सत्यमानेन सर्वज्ञो भगवान् हरिः।
पातु सर्वैः स्वरुपैर्नः सदा सर्वत्र सर्वगः ॥३३॥
विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान् नारसिंहः।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥३४॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम्।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥३५॥
एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥३६॥
न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥३७॥
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥३८॥
तस्योपरि विमानेन गन्धर्वपतिरेकदा।
ययौ चित्ररथ स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३९॥
गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः।
स वालखिल्यवचनादस्थीन्यादाय विस्मितः।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वयन्वगात् ॥४०॥

॥ श्रीशुक उवाच ॥

य इदं श्रृणुयात् काले यो धारयति चादृतः।

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:

तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥४१॥
उतां विद्यामधिगतो विश्वरुपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनर्जित्य मृधेऽसुरान् ॥४२॥

॥ इति श्रीनारायणकवचं सम्पूर्णम् ॥

नवग्रह र अष्टयोगिनी दान सामग्री

सूर्य ग्रह दान सामग्री (पिंगला दशा)

मणि, गहुँ, सखर, बाच्छा सहितको गाई, कमलको फूल, रातो चन्दन, रातो कपडा, सुन, तामा, केशरी, मुगा, दक्षिणा र जप सङ्ख्या ७००० गर्ने, रत्नमा माणिक्य लगाउने ।

चन्द्र ग्रह दान सामग्री (मंगला दशा)

चामल, सेतो कपडा, सेतो चन्दन, सेतो फूल, चाँदी, चिनी, ध्यू, शंख, मोती, कपुर, दक्षिणा यथासक्दो र ११००० जप गर्ने, रत्नमा मोती लगाउने

मंगल ग्रह दान सामग्री (भ्रामरी दशा)

मुगा, मुसुराको दाल, गहुँ, रातो गोरु, सखर, रातो चन्दन, रातो कपडा, रातो फूल, सुन, तामा, केशरी, कस्तुरी, दक्षिणा यथासक्दो र जप १०,००० गर्ने, रत्नमा- मुगा लगाउने

बुध ग्रह दान सामग्री (भद्रिका दशा)

काँसको कचौरा, हरियो कपडा, हात्तीको दाँत, ध्यू, मुगा, पत्थर, सुन, विभिन्न जातका फूल, कपुर, षट्रसयुक्त भोजन, दक्षिणा र जप संख्या ९००० गर्ने, रत्नमा पन्ना लगाउने ।

वृहस्पति ग्रह दान सामग्री (धान्या दशा)

पहेंलो अन्न, पहेंलो कपडा, पहेंलो फलफूल, सुन, पुष्पराज, हलेदो (बेसार) पुस्तक, सखर, छाता, र भूमि (माटो), दक्षिणा र जप १९००० जप गर्ने, रत्नमा पुष्पराज लगाउने ।

शुक्र ग्रह दान सामग्री (सिद्धा दशा)

सेतो चन्दन, चामल, फूल, विभिन्न रंग भएको कपडा, चाँदी, हिरा, सुन घिउ, दही, घोडा, गाई, सखर, धुप, दक्षिणा यथासक्दो र जप १६००० गर्ने, रत्नमा- हीरा लगाउने ।

शनि ग्रह दान सामग्री (उल्का दशा)

दान गर्ने वस्तुमा- कालो कपडा, फलफूल, गहत, फलाम, कालो गाई, जुत्ता, कस्तुरी, सुन, तिल, मास तेल, दक्षिणा यथासक्दो र जप २३००० गर्ने, रत्न- नीलम लगाउने ।

राहु ग्रह दान सामग्री (संकटा दशा)

दान गर्ने वस्तुमा- सातथरीको अन्न, मास, सुनको नाग, नीलो कपडा,

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri. Funding:

कालो फूल, तिल, तेल, तरवार, फलाम, नाइलो, कम्बल, तामाको थाली र दक्षिणा यथासक्दो, जप सङ्ख्या १८००० गर्ने, रत्न– गोमेद लगाउने।

केतु ग्रह दान सामग्री (विकट दशा)

दान गर्ने वस्तुमा- कस्तुरी, मास, कम्बल, कालो फूल, कालो कपडा, तिल, तेल, फलाम, बोको, शस्त्र (हतियार) सुन, दक्षिणा यथासक्दो र जप १७००० गर्ने, रत्न वैदुर्यमणि लगाउने।

ग्रहशान्तिका लागि ग्रहअनुसारको तान्त्रिक मन्त्र

ग्रह	मन्त्र	जपसंख्या
सूर्य	ॐ घृणी सूर्याय नमः	७ हजार वा ७ सय
चन्द्र	ॐ सों सोमाये नमः	११ हजार वा ११ सय
मंगल	ॐ अं अंगारकाये नमः	१० हजार/ १ हजार
वुध	ॐ बुं बुधाय नमः	८ हजार वा ८ सय
वृहस्पति	ॐ वृं वृहस्पतये नमः	१९ हजार/ १९ सय
शुक्र	ॐ शुं शुक्राय नम :	११ हजार वा ११ सय
शनि	ॐ शं शनिश्चराये नमः	२३ हजार वा २३ सय
राहु	ॐ रां राहवे नम :	१८ हजार १८ सय
केतु	ॐ कें केतवे नमः	१७ हजार वा ७ सय

टीका लगाइदिंदा औंलाअनुसारको फल

टीका लगाउँदा साहिली औंलाले टीका लगाए शान्ति मिल्छ, माहिली औंलाले टीका लगाए आयु बढ्छ, बूढी औंलाले टीका लगाए पुष्टि प्राप्त हुन्छ र चोरऔंलाले टीका लगाए मोक्ष मिल्छ।

नवग्रह गायत्री मन्त्र

सूर्यः ॐ आदित्याय च विद्महे प्रभाकराय धीमहि तन्नो सूर्यः प्रचोदयात्।
चन्द्र : ॐ अमृताङ्गाय विद्महे कलारूपाय धीमहि तन्नो सोमः प्रचोदयात्।
मंगल : ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात्।
वुध : ॐ सौम्यरूपाय विद्महे वाणेशाय च धीमहि तन्नो सौम्यः प्रचोदयात्।
गुरू : ॐ आङ्गिरसाय विद्महे दिव्यदेहाय धीमहि तन्नोः जीवः प्रचोदयात्।
शुक्र : ॐ भृगुजाय विद्महे दिव्यदेहाय धीमहि तन्नो शुक्रः प्रचोदयात्।
शनि : ॐ सूर्यपुत्राय विद्महै मृत्युरूपाय धीमहि तन्नोः सौरिः प्रचोदयात्।
राहु : ॐ शिरोरूपाय विद्महे अमृतेशाय धीमहि तन्नो राहुः प्रचोदयात्।
केतु : ॐ पद्मपुत्राय विद्महे अमृतेशाय धीमहि तन्नो केतुः प्रचोदयात्।
हनुमान गायत्री ॐ अञ्जनीजाय विद्महे वायुपुत्राये धीमहि तन्नो हनुमान् प्रचोदयात्।
वगलामुखी गायत्रीः ॐ वगलामुख्यै च विद्महे स्तम्भिन्यै च धीमहि तन्नो देवी प्रचोदयात्।

Acc. 92259 12251

राशिअनुसारका मन्त्र (दीक्षा मन्त्र)

राशि	मन्त्र	इष्टदेवता
मेष	ॐ लक्ष्मीनारायणाय नमः	श्री लक्ष्मीनारायण
वेष	ॐ ह्रीं विश्वरुपाय नमः	श्री विराटस्वरूप
मिथुन	ॐ ह्रीं क्रीं: केशवाय नमः	श्रीशङ्खचक्रधारी विष्णु
कर्कट	ॐ ह्रीं सन्याय हिरण्यरुपाय नमः	ब्रह्मा, विष्णु, महेश
सिंह	ॐ बालमुकुन्दाय नमः	दही खान लागेका कृष्ण
कन्या	ॐ ह्रीं परमात्मने नमः	श्री पीताम्बरधारी विष्णु
तुला	ॐ श्रीं रामचन्द्राय नमः	मर्यादा पुरुषोत्तम श्रीराम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

वृश्चिक	ॐ क्रीं जानकीरामाय नमः	गजेन्द्र उद्धारक श्रीहरि
धनु	ॐ क्रीं भगवते नमः	शेषशायी श्री विष्णु
मकर	ॐ श्रीवत्साय उपेन्द्राय नमः	बटुवामन श्री त्रिविक्रम
कुम्भ	ॐ श्री गोपालगोविन्दाय नमः	गाईसहित श्रीवेणुगोपाल
मीन	श्रीं ह्रीं श्रीं क्रीं रयाङ्गचक्राय नमः	ओखलमा बाँधेका कृष्ण

कुन भगवान्‌लाई कति सुते बत्ति बालिन्छ ?

५ सुते	शिवजीलाई	शुद्ध घिउमा, निराजन ३। आरती ११
९ सुते	देवीलाई	शुद्धतिलको तेलमा
१२ सुते	सूर्यलाई	शुद्धतिलको तेलमा
१६ सुते	नारायणलाई	शुद्धतिलको तेलमा
२१ सुते	गणेशलाई	शुद्धतिलको तेलमा
१६ सुते	सन्तोषीमाता, चन्द्रमा, लक्ष्मीलाई।	
५४ सुते	भागवत सप्ताहमा आफूजत्तिकै लामो गरी बाल्ने।	
५ सुते	सबै देवतालाई बाल्न पनि सकिन्छ।	

नेपाली भाषाको आरती

ॐ जय जगदीश हरे, प्रभु ! जय जगदीश हरे ॥
'प्रभुका चरण–उपासक'[२]कतिकति पार तरे।ॐ जय जगदीश हरे,
मनको थाल मनोहर 'प्रेमरुप बाती' ।प्रभु ।[२]
'भाव कपूर छ मङ्गल'[२]आरती सब भाँती ॥ॐ जय....
नित्य निरञ्जन निर्मल 'कारण अविनाशी' ।प्रभु ।[२]
'शरणागत प्रतिपालक'[२]चिन्मय सुखराशि ॥ॐ जय ....
सृष्टिस्थितिलयकर्ता 'त्रिभुवनका स्वामी' ।प्रभु ।[२]
'भक्तिसुधा वर्षाऊ'[२] शरण पर्यौं हामी ॥ॐ जय ....
असुर भाव निवारक 'तारक सुखदाता' ।प्रभु ।[२]
'गुण अनुरुप तिमी हौं'[२] हरिहर हौं धाता ॥ ॐ जय ....
युगयुग पावन गर्छौ 'अगणित रुप धरी' ।प्रभु ।[२]
'लीलामय रस विग्रह'[२]करुणा मूर्ति हरि ॥ॐ जय ...
समता शान्ति प्रदायक 'सज्जन हितकारी' ।प्रभु ।[२]
'चरणशरण अब पाऔं'[२]प्रभु भवभयहारी ॥ॐ जय ...
भाव सुनिर्मल देऊ 'साधक फलदायी' ।प्रभु ।[२]
'जीवन धन्य बनोस्'[२] प्रभु पदसेवा पाई ॥ॐ जय ...
संयम सुरसरिताको 'अविरल धार वहोस' ।प्रभु[२]
'जतिजति जन्मभएपनि'[२]प्रभुमा प्रेम रहोस्॥ॐ जय ...
प्रेमसहित शुभ आरती 'जसले नित्य गर्यो' ।प्रभु ।[२]
'दिनदिन निर्मल बन्दै'[२]त्यो भवसिन्धु तर्यो ॥ ॐ जय ...
'प्रभुका चरण–उपासक'[२]कतिकति पार तरे।
ॐ जय जगदीश हरे, प्रभु ! जय जगदीश हरे ॥

वैदिक मन्त्र

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ शान्ति ! शान्ति !! शान्ति !!!

(अर्थः पूर्णमान्‌को पूर्ण हो यो पूर्णले पूर्ण बन्दछ। लिएर पूर्णको पूर्ण बाँकी बच्दछ पूर्ण नै ॥ शान्ति होस् ॥ शान्ति होस् ॥ शान्ति होस् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

epal Sanskrit University, Balmeeki Campus, Kathman

In Public Domain. Digitization by eGangotri.Funding:



पुस्तकका लागि सम्पर्क
नेपाल अधिराज्यका सम्पूर्ण पुस्तक पसलहरू
तथा काठमाडौंका प्रमुख पुस्तक वितरकहरू

epal Sanskrit University, Balmeeki Campus, Kathmand